INTERNATIONAL JOURNAL OF RESEARCH – GRANTHAALAYAH
A knowledge Repository

Social

# ALANKARAS IN RATNAVALI

**Dr.Sujatha Raghavan** *[1]
*[1] Professor in Sahitya, Dept of Sanskrit & IC, SCSVMV University, Enathur, Kanchipuram
Tamilnadu – 631561, INDIA

**DOI:** 10.5281/zenodo.165212

## ABSTRACT

***RATNAVALI Drama was written by SRI HARSHA a famous poet in Sanskrit. It contains four acts. Udayana is the courages Hero and Rarnavali is heroine in this drama. The main sentiment in this drama is SRINGARA, and main Virtham is KOWSIKI. Here the author describes the love between Udayana and Ratnavali in heart touching and beautiful manner. Many types of Alankaras used for this purpose which was taken from Kuvalayananda.***

**Keywords:**
*Uadayana-ratnavali-sringara; rasa-kowsiki; vritam-kuvaayananda-upama; alankara-uthprksha; alankara-samasokthi; alankara- swapavokthi; alankara- kavyalingamalankara.*

**Cite This Article:** Dr.Sujatha Raghavan, “ALANKARAS IN RATNAVALI” International Journal of Research - Granthaalayah, Vol. 4, No. 10 (2016): 126-131.

ललितः इयमपि नाटिका चतुराङ्किककाः। तस्या कर्ता श्रीहर्षः। नायकः उदयनः धीरललिः। नायिका रत्नावली। कैशिकीवृत्तिः। अत्र श्रृङ्गाररसः मुख्यः। सिंहलाधिपतेः सुताया रत्नावल्याः उदयनस्य च प्रेमप्रसङ्गे वर्णितः अस्ति। नागानन्दं हि पञ्चाङ्कं नाटकम्। नायकः जीमूतवाहनः धीरोदात्तः। नायिका च मलयवती। मुख्यरसः शान्तः। अत्र जीमूतवाहनस्य औदार्यं स्वनिपुणं चित्रितमस्ति। येषु च रत्नावली लक्षणशास्त्रिभिर्धनि कविविश्वनाथप्रभृतिः नाट्यशास्त्रलक्षण सम्मतेति सादरमुदृधृता दृश्यते। श्रीहर्षस्यू शैली सरसा सरला वैदर्भीप्रधाना च।

रत्नावल्यां अलङ्कारलक्षणानि कुवलयानन्दात् स्वीकृतानि। कुवलयानन्दः इति अलङ्कार ग्रन्थः अप्पयदीक्षितेन लिखितः। ग्रन्थे अलङ्काराः तेषां लक्षणानि सन्ति।

## १. उपमालङ्कारः

**उपमा यत्र सादृश्य लक्ष्मी रुल्लसति द्वयोः।[1]**

<u>उदाहरणम्-</u>

**उदयतटान्तरितमियं प्राची सूचयति दिङ्निशा नाथम्।**

**परिपाण्डुना मुखेन प्रियमिव हृदयास्थितं रमणी।।[2]**

एषा पूर्वदिशा सर्वतः पाण्डुवर्णेन मुखेन निशानाथं चन्द्रमुदयगिरेः पूर्वपर्वतस्य तटेन क्षेत्रेण व्यवहितं सूचयति। यथा रमणी प्रोषितभर्तुका परिपाण्डुना मुखेन प्रियं हृदयस्थितिं सूचयति तथा। अत्र उपमालङ्कारः प्रयोगं अस्ति।

**२. उत्प्रेक्षालङ्कारः**

**संभवनास्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।**

**उक्तानुक्तास्पदाद्यात्र सिद्धाऽसिद्धास्पदे पदे।।[3]**

<u>उदाहरणम्</u>

**उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषां बिभ्रतो**

**भृङ्गलीविरुतैः कलैरविशदव्याहारलीलाभृतः।**

**घर्णान्तोमलयानिलाहतिचलैः शखासमूहैर्मुहुः**

**र्भान्ति प्राप्य मधुप्रसङ्गमधुना मत्ता इवामि द्रुमाः।।[4]**

अधिना मद्यस्य सम्पर्कं प्राप्य उद्यतामुदगच्छतां प्रबलानां कान्तिरिव पल्लवैः मरुणां द्युतिं धारयन्तः। कलैः मधुरास्पुटैः भ्रमश्राणीनां हारस्य विलासं बिभ्रति। दक्षिणवातस्य चञ्चलैः विटपसमूहैः पुनः घूर्णन्तो मत्ता इव प्रकाशन्ते। अत्र उत्प्रेक्षालङ्कारः भवति।

**३. समासोक्त्यालङ्कारः**

**समासोक्तिः परिस्फुर्तिः प्रस्तुतेऽप्रस्तुत चेत्।[5]**

<u>उदाहरणम्</u>

**यातोस्मि पद्मनयने समयो ममैष**

**सुप्ता मयैव भवती प्रतिबोधनीया।**

**प्रत्यायनामयमितीव सरोरुहिणयाः**

**सूर्योऽस्तमस्तकनिविष्टकरः करोति।।[6]**

हे पद्मनयने! प्रस्थितमस्मि अयं मम गमनावसरः। निद्रां उपागतं त्वं मया एव सूर्येनेव उद्बोधनीय अस्तचलशिखरे स्थिताः किरणाः तादृशः दृश्यमानः दिनकरः कमलिन्याः आश्वासनं करोति। अत्र कमलिनि सूर्यवृत्तान्त व्याजेन नायिकानायकयोः भावि वृत्तान्तः स्वचितः तदर्थं अत्र समासोक्तिः।

**४. स्वभावोक्त्यलङ्कारः**

**स्वभावोक्तिः स्वाभावस्य जात्यादिस्थस्य वर्णनम्।[7]**

<u>उदाहरणम्</u>

**ह्लिलया सर्वस्यासौ हरति विदितास्मीति वदनं**

**द्वयोदृष्ट्वालापं कलयति कथामात्मविषयाम्।**

**सुखीषु स्मरासु प्रकटयति वैलक्ष्यमधिकम्**

**प्रिया प्रायेणास्ते हृदयनिहितान्तङ्कविधुरा।।[8]**

राजाभिलाषतया ज्ञातस्मि इति मत्वा वल्लभा बाहुल्येन यावत् हृदयस्थितः यः भातिः विकला वर्तते। सागरिका लज्जया निखिलस्य वदनं व्यावर्तयति। जनयोः परस्परकथोपकथनं दुष्ट्वा स्वसम्बन्धिनीं वार्तां अवधारयति। सहचरीषु ईषद्भ्रान्तीषु अत्यन्तं लज्जां प्रकटयति। अत्र श्लोके शङ्काव्यभिचारीभावः संदर्शितः तथैव स्वभावोक्त्यालङ्कारः।

**५. काव्यलिङ्गमलङ्कारः**

**समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।[9]**

<u>उदाहरणम्</u>

**भ्रूभङ्गे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-**

**मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।**

**अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं**

**कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः।।[10]**

प्रियमया वासवदत्ताया कर्तुं समर्थतया भ्रुवोर्भङ्गः तत्क्षणं आविर्भूतोपि मुखं शयवतीं नम्रतां प्रापितम्। ममुद्दिश्य मुखं प्रणयविद्वंशी अल्पं हसितं कृतः। कठोर वचः न उक्तम्। अन्तबोस्पेन मन्दीतं नयनं न उन्मीलितम्। तस्मात् प्रियया कोपः प्रकाशितः। प्रणयश्च न मुक्तः। अत्र प्रथमपादत्रयोक्त वाक्यार्थानां चतुर्थचरणोक्तं प्रति हेतुत्वात् काव्यलिङ्गमलङ्कारः।

**६. अर्थान्तरान्यासालङ्कारः**

**उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।[11]**

विषयोः सामान्यसमर्थनरुपस्य अर्थान्तरन्यासलङ्कारः

<u>उदाहरणम्</u>

**दुर्वारां कुसुमशरव्यथां वहन्त्या**

**कामिन्या यदभिहितं पुरः सखीनामा।**

**तद्भूयः शिशुशुकसारिकाभिरूक्तं**

**धन्यानां श्रवणपथतिथित्वमेति।।[12]**

दुःखेन आर्थते या तां कामदेवस्य पीडां धारयन्त्या तरुण्यां सुखीनां पुरः यद् उक्तम्। तत् शिशुभिः सागरिकाभिः पुनः कथितम्। पुण्यवतां पुरुषानां श्रवणपयः अतिथित्वं प्राप्नोति। दूरभाषितं तद्वयनस्य साक्षाच्छ्रवणं पक्षिभिरूचरि पुनस्तद्वचनं येषां कर्णगोचरी भवति ते धन्या इति भावः अत्र अर्थान्तरन्यासालङ्कारः।

ISSN- 2350-0530(O) ISSN- 2394-3629(P)
IF: 4.321 (CosmosImpactFactor), 2.532 (I2OR)

**७. रूपकालङ्कारः**

**विषय्यभेदाद्रुप्यरञ्जनं विषयस्य यत्।**

**रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयेक्तिभिः।**[13]

<u>उदाहरणम्</u>

**विरम विरम वह्ने मुञ्च धूमानुबन्धं**

**प्रकटयसि किमुच्चैरचिषां चक्रवाल्यम्।**

**विरहहुतभुजाऽहं यो न दग्धः प्रियायाः**

**प्रलयदहनभासा तस्य किं त्वं करोषि।।**[14]

हे वह्ने! त्वं विरम विरम धूमोत्पातं त्यज। ज्वलानां मण्डलं किमर्थं विस्तारयसि यः अहं वत्सराज उदयनः प्रियतमायाः प्रलयकालाग्नि तुल्यतेजसा विरहहुतभुजां न ज्वालितः। त्वं किं करोषि?। विफलमिति भावः तदर्थं रूपकालङ्कारः।

**८. विभावनालङ्कारः**

**विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।**[15]

कारणं विना कार्यस्य उत्पत्तिः भवति चेत् विभावनालङ्कारः। क्रियायाः प्रतिषेधेऽपि फलव्यक्तिविभावना।

<u>उदाहरणम्</u>

**मनश्चलं प्रकृत्यैव दुर्लक्ष्यं च तथापि मे।**

**कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः।।**[16]

चित्तं स्वाभावेन चञ्चलं लक्षयितुं अशक्यश्च तथापि मनसः चलत्वे सूक्ष्मत्वे सत्यपि मम मनः अनङ्गेन निखिलैः भाणैः तुल्यकालं केन प्रकारेण भिन्नः। अत्र कारणं विना कार्यस्य उत्पत्तिः तथैव विभावनालङ्कारः।

**९. विरोधाभासालङ्कारः**

**आभासत्वे विरोधस्य विरोधाभास इष्यते।**[17]

<u>उदाहरणम्</u>

**किं धरण्यां मृगाङ्कः आकाशे महीधरो जले ज्वलनः।**

**मध्याह्ने प्रदोषो दर्श्यतां देहभाज्ञप्तिम्।।**[18]

किं पृथिव्यां चन्द्रः नभसि पर्वतः सलिले अग्निः मध्याह्नकाले सायंकालः प्राप्यतां आदेशय। अत्र विरोधाभासत्वे भवति तथैव विरोधाभासालङ्कारः।

**१०. प्रतीपालङ्कारः**

**प्रतीपमुपानस्योपमेयत्वप्रल्पनम्।**

**आक्षेप उपमानस्य प्रदीपम उपमेयता।।[19]इति**

<u>उदाहरणम्</u>

**किं पद्मस्य रुचं न हन्ति नयनानन्दं विधते न किं**

**वृद्धिं वा ज्ञषकेतनस्य कुरुते नालोकमात्रेण किम्।**

**वक्त्रेन्द्रौ तव सत्ययं पदपरः शीतांशुरभ्युद्गतो**

**दर्षः स्यादमृतेन चेदिह् तदप्येवास्ति बिम्बाधरे।।[20]**

तव वक्त्रेन्दुः कमलस्य त्विषं न पराजयति किम्?। नेत्राणां आनन्दमाह्लादकत्वं न विद्यते किम्। अथवा आलोकमात्रेण कन्दर्पस्य उद्वीसुं न विदधातिकिम्। यस्मात् भवत्याः चन्द्रवदनेविद्यमाने दृश्यमानः स्वमुखात् अतिरिक्तः शुरिन्दुः उदितः।

चेद्यपि सुधया चन्द्रस्य अलङ्कारः भवेत्। अमृतमपि अस्मिन् तव बिम्बफलतुल्याधरोष्ठे वर्तते एव। अत्र प्रतिपालङ्कारः।

**उपसंहारः**

श्रीहर्षस्य रूपकत्रये रत्नावली अत्यन्तं प्रसिद्धम्। अनेन प्रकारेण रत्नावल्याः अलङ्काराः सन्ति। आलङ्कारिकैः स्वग्रन्थेषु बहुत्र रत्नावली श्लोकाः उदाहरणत्वेन दर्शिताः दृश्यन्ते।

**उपयुक्तग्रन्थसूची**

१. कुवलयानन्दः -- अप्पय्यदीक्षितः चौखाम्बा १९९३
२. कुवलयानन्दः -- भोलाशंकर व्यस(हिन्दी अनुवादम्) चौखाम्बा १९९३
३. रत्नावली -- M.R. Kale चौखाम्बा, चौखाम्बा १९९३

**अध्यायान्त टिप्पणी**

१. कुवलयानन्दम्.६
२. रत्नावलायाम्.२४
३. कुवलयानन्दम्.३२
४. रत्नावलायाम्.१.२७
५. कुवलयानन्दम्.३१
६. रत्नावलायाम्.३.६
७. कुवलयानन्दम्.१६०
८. रत्नावलायाम्.३.४
९. कुवलयानन्दम्.१२१

ISSN- 2350-0530(O) ISSN- 2394-3629(P)
IF: 4.321 (CosmosImpactFactor), 2.532 (I2OR)

१०. रत्नावलायाम्.२.२२
११. कुवलयानन्दम्.१२२
१२. रत्नावलायाम्.२.७
१३. कुवलयानन्दम्.१७
१४. रत्नावलायाम्.४.२६
१५. कुवलयानन्दम्.७७
१६. रत्नावलायाम्.३.२
१७. कुवलयानन्दम्.७६
१८. रत्नावलायाम्.४.८
१९. कुवलयानन्दम्.१२
२०. रत्नावलायाम्.३.२३